The authoritative character of *arthavāda* or explanatory passages pertaining to *mantra-s* should be accepted, even though they convey a different idea [as they go to support the *mantra* passages of the Veda-s]. By declaring them [*arthavāda* passages] unauthoritative, king Nahuṣa became a serpent. How it was is explained in the *Mahābhārata* (Udyoga Par. ch. 17): 'The Ṛṣi-s, when they were ordered to be his palanquin-bearers by the evil-minded one (Nahuṣa), they, the divine Ṛṣi-s and also the pure Brahmarṣi-s, questioned Nahuṣa, whose mind was bent upon evil, concerning a doubtful point thus: 'O Vāsava (officiating Indra)! Are the Brāhmaṇa portions (of the Veda-s) that refer to the purification of the sacrificial cows authoritative or not?' Nahuṣa, confused in mind, replied that they undoubtedly are not [authoritative]. Then the Ṛṣi-s said: 'You are inclined to evil and abandon the *dharma*; they [the Brāhmaṇa portions] having been promulgated by the ancient Maharṣi-s are authoritative to us. Agastya said: "Thereupon the king (Nahuṣa), falling out with the Ṛṣi-s and being propelled by vice, placed his foot on my head. Then, O Lord of Śacī, he became deprived of sense and devoid of glory." Thereupon I addressed him (Nahuṣa), who was then trembling with fear, thus: "You have reviled the sacred path chalked out by the ancients and followed by the Ṛṣi-s; you have placed your foot on my head; and you have also, O fool, made palanquin-bearers of the Ṛṣi-s, who are like unto Brahmā and who are unassailable; therefore, fall down from

heaven, bereft of all glory, degraded by your own sin and deprived of virtues, O king of earth; remain ten thousand years on the earth assuming the form of a serpent. Then, by virtue of meeting king Yudhiṣṭhira of your own race, you shall, leaving the form of the serpent, again reach heaven." ' Therefore the knowledge of Self should be accepted with faith. The Lord (*BG*, 9. 3) says: 'Men without faith, not receiving this *dharma*, O Arjuna, reach me not; they return to the paths of this mortal world.' In the *Aitareyaka* (*Ai. Ā* 2. 1. 1) also we find: 'This is the path, this is action, this is Brahman, this is Truth. Let no man swerve from it, let no man transgress it. For the ancients did not transgress it, and those who transgressed it became lost.' This has been declared by a Ṛṣi (*RV*, 8. 101. 14): 'Three classes of people transgressed, others settled down round about the venerable Agni, the great sun stood in the midst of the worlds, the blowing Vāyu entered the Harit-s (the dawns or the ends of the earth).' 'When he says, "three classes of people transgressed", the three classses of people who transgressed are what we see here [on earth, born again] as birds, trees, herbs and serpents (*TĀ*, 2. 1).' (The third) *mantra* of the *ĪU* censures the ignorant thus: 'There are the worlds of Asura-s covered with blind darkness. Those who have destroyed their self go after death to those worlds.' The *TU*, 2. 6 says: 'He who knows Brahman as non-existing becomes himself non-existing.' In the *Śakuntalopākhyāna* (*MB*, 1. 68. 26) also we find: 'What sin is not committed by

the thief who deprives himself of his Self, by thinking that the Self that is one is diversified?' Now we have said enough.

For reciting the thousand names a suitable mental bath is prescribed. The *Mahābhārata* (12. 218. 25) says: 'That is mental bath (*mānasatīrtha*), by bathing wherein the *deva-s* and the Veda-s attain purity, perfection and oneness; and having bathed therein one attains immortality. He who bathes in the mental river, in the depth of knowledge and in the waters of meditation which remove the dirt of desire and hatred, attains the supreme state.' 'In the sacred lake of Mānasa with its depths of knowledge and waters of meditation—the lake which washes off the impurities of attachment and aversion—whosoever bathes proceeds to the goal supreme.' 'The river Sarasvatī in the form of *rajas*, the Yamunā in the form of *tamas*, and the Gaṅgā in the form of *sattva* flow not unto Brahman beyond all attributes.' 'The Ātman is the river filled with the water of self-control; truth is its depth; right conduct is the bank; compassion is the wave; bathe in it, O son of Pāṇḍu, the inner Self is never purified by [ordinary water].' *Viṣṇusmṛti* says: 'Mental bath is meditation upon Viṣṇu.' Manu says (2. 87): 'But, undoubtedly, a Brāhmaṇa reaches the highest goal by reciting prayers only; whether he performs other rites or neglects them, he who befriends all creatures is declared to be a true Brāhmaṇa.' *Japa* is the best of all *dharma-s*; and non-injury to beings precedes the *japa* sacrifice. *BG* 10. 25 says: 'Of sacrifices, I am the *japa* sacrifice.'

'Pure or otherwise, in whatever condition he may be, he who remembers the lotus-eyed one (Viṣṇu) is purified internally and externally' (*Vi. Dh.*, 109. 66).

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ।। ११ ।।

'[1]किमेकं दैवतम्' इति प्रस्तुतम् । 'यतः सर्वाणि' इति तस्योपलक्षणमुच्यते । यतो यस्मात् सर्वाणि भूतानि भवन्ति उद्भवन्ति । आदियुगागमे । यस्मिंश्च प्रलयं विनाशं यान्ति, पुनः भूयः, एवेत्यवधारणार्थः । नान्यस्मिन्नित्यर्थः । युगक्षये महाप्रलये, चकारात् मध्येऽपि यस्मिन् तिष्ठन्ति । 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभि-संविशन्ति' (तै. उ. ३. १) इति श्रुतेः ।। ११ ।।

The attributes of the one Deity mentioned before will now be described.

11. That from which all beings emanate in the beginning of the *yuga*, and into which they are indeed dissolved again when the *yuga* comes to an end.

'Indeed' denotes emphasis. When the world age *yuga* comes to an end, that is, when *mahāpralaya* sets in. The intermediate stage of existence is also meant here. The *śruti* (*TU*, 3. 1) says: 'That from which these beings are born, by which they remain alive, and into which, on departing, they enter.'

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ।। १२ ।।

[1] यदेकं दैवतम्.

तस्य एवंलक्षणलक्षितस्य एकस्य दैवतस्य लोकप्रधानस्य लोकनहेतुभिर्विद्यास्थानैः प्रतिपाद्यमानस्य जगन्नाथस्य जगतां नाथः स्वामी मायाशबलः परमात्मा निर्लेपश्च तस्य, भूपते! महीपाल! विष्णोः—व्यापनशीलस्य, नामसहस्रं नाम्नां सहस्रं, पापं भयं चापहन्तीति पापभयापहं, त्वं मे मम, मत्तः शृणु—एकाग्रमना भूत्वा अवधारय ॥

'[1]एकस्यैव समस्तस्य ब्रह्मणो द्विजसत्तम ।
नाम्नां [2]सहस्रं लोकानामुपकारकरं शृणु ॥
निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् ।
विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम! ॥
यच्छक्ति नाम यत्तस्य तत्तस्मिन्नेव वस्तुनि ।
साधकं पुरुषव्याघ्र! सौम्यक्रूरेषु वस्तुषु ॥
इति विष्णुधर्मे (४१. १०-१२) ॥ १२ ॥

12. O king, hear from me the thousand names of Viṣṇu, the Lord of the universe, the highest in the worlds; these remove all sins and fear.

Of Viṣṇu: of the one Deity who has been described by the aforesaid characteristics. *The Highest*: He is described by the various lores (*vidyā-s*) which lead one to perceive [Him]. *Viṣṇu*: the all-pervading. *Hear* with concentrated attention and assimilate. *Viṣṇudharma* (41. 10-12) says: 'Hear, O first among the twice-born, the various names of the one only and all-pervading Brahman that serve to help all men. Their effects

[1] कालस्येव. [2] बहुत्वं.

vary according to the objects in view of the reciter. By repeating the names, the corresponding results accrue. Whatever power belongs to a name is effective, whether for good or for evil, in that sphere alone.' Though (verse 13) there is no room in the unconditioned for any of those potential energies that give rise to expressions denoting relation, qualities, actions, class and conventional terms, yet in regard to the conditioned (*saguṇa*) Brahman which is subject to modifications these expressions are possible, as it is the Self of all. Hence all speech has for its content the supreme Puruṣa.

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये* ।। १३ ।।

* इतः परं दाक्षिणात्यपुस्तकेषु अधोनिर्दिश्यमानोऽधिकः पाठो दृश्यते—

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ।।
अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः ।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते ।।
विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम् ।।

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य श्रीवेदव्यासो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता ।

अमृतांशूद्भवो भानुरिति बीजम् । देवकीनन्दनः स्रष्टेति शक्तिः । उद्भवः क्षोभणो देव इति परमो मन्त्रः । शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् । रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । त्रिसामा सामगः सामेति कवचम् । आनन्दं परब्रह्मेति योनिः । ऋतुः सुदर्शनः काल इति दिग्बन्धः । श्रीविश्वरूप इति ध्यानम् ।। श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः । ध्यानम्—

यद्यपि परस्य ब्रह्मणः षष्ठीगुणक्रियाजातिरूढीनां शब्दप्रवृत्तिहेतुभूतानां निमित्तशक्तीनां चासंभवः, तथापि सगुणे ब्रह्मणि सविकारे च सर्वात्मकत्वात् तेषां शब्दप्रवृत्तिहेतूनां संभवात् सर्वे शब्दाः परस्मिन् पुंसि प्रवर्तन्ते । तत्र यानि नामानि गौणानि गुणसंबन्धीनि गुणयोगात् प्रवृत्तानि, तेषु च यानि विख्यातानि प्रसिद्धानि, ऋषिभिः मन्त्रैः तद्दर्शिभिश्च, परिगीतानि परितः समन्ततः परमेश्वराख्यानेषु तत्र तत्र गीतानि । महांश्चासावात्मा चेति महात्मा ।

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षै-
रानन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥
भूःपादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य [1]वास्तेयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै-
श्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाकारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥
मेघश्यामं पीतकौशेयवासं श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं विष्णुं वन्दे सर्वलोकैकनाथम् ॥
सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥
छायायां पारिजातस्य हेमसिंहासनोपरि ।
आसीनमम्बुदश्याममायताक्षमलंकृतम् ॥
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम् ।
रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये ॥

[1] वासोऽयम्.

‘ यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।
यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्यते ।। ’

इति वचनात् । अयमेव महानात्मेति महात्मा तस्य अचिन्त्य-प्रभावस्य, तानि वक्ष्यामि भूतये पुरुषार्थचतुष्टयसिद्धये पुरुषार्थ-चतुष्टयार्थिनामिति ।।

अत्र नामसहस्रे आदित्यादिशब्दानामर्थान्तरे प्रसिद्धाना-मादित्याद्यर्थानां तद्विभूतित्वेन तदभेदात् तस्यैव स्तुतिरिति प्रसिद्धार्थग्रहणेऽपि तत्स्तुतित्वम ।।

‘ भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् ।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ।। ’

‘ ज्योतींषि विष्णुर्भुवनानि विष्णु-
र्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं
यदस्ति यन्नास्ति च विप्रवर्य ’ ।।

इति विष्णुपुराणे (२. १२. ३७) । ‘श्रीपतिः, माधवः’ इत्यादीनां वृत्त्येकत्वेऽपि शब्दभेदान्न पौनरुक्त्यम् । अर्थैक्येऽपि पौनरुक्त्यं न दोषाय; नाम्नां सहस्रस्य ‘किमेकं दैवतम्’ इति पृष्टैकदेवताविषयत्वात् । यत्र पुंलिङ्गशब्दप्रयोगः तत्र विष्णुर्विशेष्यः । यत्र स्त्रीलिङ्गशब्दः तत्र देवता विशेष्यते । यत्र नपुंसकलिङ्गशब्दः तत्र ब्रह्मेति विशेष्यते ।। १३ ।।

इति पूर्वपीठिका समाप्ता

Of such:

13. I shall for the good [of all] recite those names of the great Self that are expressive of His attributes and that are celebrated and well sung by the Ṛṣi-s.

Ṛṣi-s: *Mantra-s* and their seers. Well sung: in the episodes about the supreme Lord. *Self*: 'Since he realizes, receives and enjoys the objects here, and since he is eternally existing, He is named Ātman.' He (Viṣṇu) only is the great Ātman who possesses unimaginable powers. *For the good*: of those who desire the four goals of human life in order to enable them to attain the same.

Amongst these thousand names, the words *sun*, etc. having individual connotations as 'the [visible] sun,' etc. really mean Himself and are His praises, since they are only His manifestations and are not distinct from Him. 'You are the elemental self (*bhūtātman*), the sensory self (*indriyātman*), the primordial Self (*pradhānātman*), the Self and the supreme Self. Thus you, the only one, are in five forms.' *VP*, 2. 12. 37 says: 'The stars are Viṣṇu, the worlds are Viṣṇu, the forests are Viṣṇu, the mountains and regions are Viṣṇu, also the rivers and oceans; he is all that is, all that is not, O best of Brāhmaṇa-s.' *BG* brings out the same idea in the verses from 10. 21: 'Of Āditya-s I am Viṣṇu' to the end 10, 42. 'Having pervaded this whole universe with a portion of Myself, I exist.' The *śruti* (*MU*, 2. 1. 10) says: 'The Puruṣa is all this, sacrifice, penance, Brahman, the highest, the immortal.'

Such words as *Viṣṇu* and the like, though repeated [in this hymn] are not tautologous, since the meaning differs with the function. The words *śrīpati*, *mādhava*, etc., though one and the same in meaning, differ in expression. Although one and the same in meaning, yet the repetition is no defect, since the questioner wanted to know the one Deity whose names are a thousand and because these denote one Devatā.

The thousand names consist of words in the masculine, feminine and neuter genders. Those in the masculine gender qualify Viṣṇu, those in the feminine qualify Devatā and those in the neuter qualify Brahman.

सहस्रनामारम्भः

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद् भूतभृद् भावो भूतात्मा भूतभावनः ।। १४ ।।

नामभाष्यारम्भः

'यतः सर्वाणि भूतानि' (श्लो. ११) इत्यारभ्य जगदुत्पत्तिस्थितिकारणस्य ब्रह्मण एकदेवतात्वेनाभिहितत्वादादावुभयविधं ब्रह्म विश्वशब्देनोच्यते । विश्वस्य जगतः कारणत्वेन हि **विश्वम्** इत्युच्यते ब्रह्म । आदौ तु विश्वमिति कार्यभूतविश्वशब्देन कारणग्रहणं कार्यभूतविरिञ्च्यादि नामभिरप्युपपन्ना स्तुतिर्विष्णोरिति दर्शयितुम् । यद्वा परस्मात् पुरुषान्न भिन्नमिदं विश्वं परमार्थतः, तेन विश्वमित्यभिधीयते ब्रह्म; 'ब्रह्मैवेदं विश्वम्' (मु. उ. २. २. ११), 'पुरुष एवेदं विश्वम्' (मु. उ. २. १. १०), 'विश्वमेवेदम्' (महाना. उ. ११. २) इत्यादिश्रुतिभ्यः

तद्भिन्नं न किंचित् परमार्थतः [1]सदस्ति । अथवा विशतीति विश्वं ब्रह्म । 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. उ. २. ६) इति श्रुतेः। किंच संहृतौ विशन्ति विश्वानि भूतानि अस्मिन्निति विश्वं ब्रह्म । 'यत्प्रयन्त्यभिसंविशन्ति' (तै. उ. ३. १) इति श्रुतेः। तथा हि—सकलं जगत् कार्यभूतम् एष विशति, अत्राखिलं विश्वं विशतीत्युभयथापि विश्वं ब्रह्म इति श्रुतेः । 'अन्यत्र धर्मादन्यत्राधर्मात्' (क. उ. २. १४) इत्यारभ्य

'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि ।।
ओमित्येतत् ।।

एतद्धयेवाक्षरं ब्रह्म एतद्धयेवाक्षरं परम् ।
एतद्धयेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ।।'
(क. उ. २. १५–१६)

इति काठके । 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः ।' (प्रश्न. उ. ५. २) इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत (५. ५) इति प्रश्नोपनिषदि । 'ओमिति ब्रह्म ओमितीदं सर्वम्' (तै. आ. ७. ७) इति यजुर्वेदारण्यके । 'तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक् संतृण्णा । ओंकार एवेदं सर्वम्' (छा. उ. २. २३) इति छान्दोग्ये । 'ओमित्येतदक्षरम्' (मा. उ. १) इत्युपक्रम्य

[1] सदस्ती (त्य) र्थः.

‘प्रणवो ह्यपरं ब्रह्म प्रणवश्च [1]परः स्मृतः ।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ।।
सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ।।
प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोंकारं ज्ञात्वा धीरो न शोचति ।।
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ।।’

(मा. का. १. २६–९) इति । ‘ओं तद् ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्सत्यम्’ (तै. आ. १०. २९) इत्यादिभ्यः श्रुतिभ्यः ।।

‘ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।’
(भ. गी. ८. १३)

‘यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ।।’ (भ. गी. ८. ११)

‘रसोऽहमप्सु कौन्तेय! प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ।।’ (भ. गी. ७. ८)
‘गिरामस्म्येकमक्षरम् ।।’ (भ. गी. १०. २५)

[1] परं तपः.

'आद्यं त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता ।
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥'

'ओंकारः स्वर्गद्वारम् । तस्माद् ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत । विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्तते ब्रह्म' (आप. ध. सू. १. ४. १३. ६–७) ।

'प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः ।
वाङ्मयं प्रणवः सर्वं तस्मात् प्रणवमभ्यसेत् ॥'

इत्यादिस्मृतिभ्यश्च । विश्वशब्देनोंकारोऽभिधीयते । वाच्यवाचकयोरत्यन्तभेदाभावाद् विश्वमित्योंकार एव ब्रह्मेत्यर्थः । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छा. उ. ३. १४) इति । एतदुक्तं भवति—यस्मात् सर्वमिदं विकारजातं ब्रह्म तज्जत्वात् तल्लत्वात् तदनत्वाच्च । न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति । तस्माच्छान्त उपासीत इति ॥

'श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥'

'आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन! ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥'

(भ. गी. ६. ३२)

'निर्गुणः परमात्मा ते देहं व्याप्य व्यवस्थितः ।
तमहं ज्ञानविज्ञेयं नावमन्ये न लङ्घये ॥
यद्यागमैर्न विन्देयं तमहं भूतभावनम् ।
क्रमेयं त्वां गिरिं चेमं हनूमानिव सागरम् ॥'

(म. भा. ३. १४७. ८-९)

'बद्धवैराणि भूतनि द्वेषं कुर्वन्ति चेत् ततः ।
सुशोच्यान्यतिमोहेन व्याप्तानीति मनीषिणाम् ।।
एते [1]भिन्नदृशा दैत्या विकल्पाः कथिता मया ।
कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ।।
विस्तारः सर्वभूतस्य विष्णोः सर्वमिदं जगत् ।
द्रष्टव्यमात्मवत् तस्मादभेदेन विचक्षणैः ।।
समुत्सृज्यासुरं भावं तस्माद्यूयं तथा वयम् ।
तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिम् ।।'

(वि. पु. १. १७. ८२–५)

'सर्वत्र दैत्याः समतामुपेत
समत्वमाराधनमच्युतस्य ।' (वि. पु. १. १७. ९०)

'न मन्त्रादिकृतस्तात! न च नैसर्गिको मम ।
स्वभाव एष सामान्यो यस्य यस्याच्युतो हृदि ।।
अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा ।
तस्य पापागमस्तात हेत्वभावान्न विद्यते ।।
कर्मणा मनसा वाचा परपीडां करोति यः ।
तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभम् ।।
सोऽहं न पापमिच्छामि न करोमि वदामि वा ।
चिन्तयन् सर्वभूतस्थमात्मन्यपि च केशवम् ।।
शारीरं मानसं वाग्जं दैवं भूतभवं तथा ।
सर्वत्र समचित्तस्य तस्य मे जायते कुतः ।।

[1] भिन्नदृशां.

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥'

(वि. पु. १. १९. ४–९)

'साम चोपप्रदानं च भेददण्डौ तथापरौ ।
उपायाः कथिता ह्येते मित्रादीनां च साधने ॥
तानेवाहं न पश्यामि मित्रादींस्तात मा क्रुधः ।
साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥
सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥'

(वि. पु. १. १९. ३५-७)

'जडानामविवेकानामसुराणामपि प्रभो ।
भाग्यभोज्यानि राज्यानि सन्त्यनीतिमतामपि ॥
तस्माद् यतेत पुण्येषु य इच्छेन्महतीं श्रियम् ।
यतितव्यं समत्वेन निर्वाणमपि चेच्छता ॥
देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ॥
द्रष्टव्यमात्मवद् विष्णुर्यतोऽयं विश्वरूपधृक् ॥
एवं ज्ञाते स भगवाननादिः परमेश्वरः ।
प्रसीदत्यच्युतो यस्मिन् प्रसन्ने क्लेशसंक्षयः ॥

(वि. पु. १. १९. ४५–९)

'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥'

(भ. गी. ७. १९)

इत्यादिवचनैश्च हिंसादिरहितेन स्तुतिनमस्कारादि कर्त-व्यमिति दर्शयितुं विश्वशब्देन ब्रह्माभिधीयत इति वा ।।

'मत्कर्मकृद् मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ।।' इति
(भ. गी. ११. ५५)

'न चलति निजवर्णधर्मतो यः
समम‍तिरात्मसुहृद्विपक्षपक्षे ।
न हरति न च हन्ति किंचिदुच्चैः
स्थितमनसं तमवेहि विष्णुभक्तम् ।।'
(वि. पु. ३. ७. २०)

'विमलमतिरमत्सरः प्रशान्तः
[1]शुभचरितोऽखिलसत्त्वमित्रभूतः ।
प्रियहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः ।।
वसति हृदि सनातने च तस्मिन्
भवति पुमान् जगतोऽस्य सौम्यरूपः ।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव सालपोतः ।।'
(वि. पु. ३. ७. २४–५)

'सकलमिदमहं च वासुदेवः
परमपुमान् परमेश्वरः स एकः ।

[1] शुचिचरिते.

इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान् विहाय दूरात् ॥'

(वि. पु. ३. ७. ३२)

'यमनियमविधूतकल्मषाणा-
मनुदिनमच्युतसक्तमानसानाम् ।
अपगतमदमानमत्सराणां
व्रज भट! दूरतरेण मानवानाम् ॥'

(वि. पु. ३. ७. २६)

इत्यादिवचनैर्वैष्णवलक्षणस्यैवंप्रकारत्वाच्च हिंसादिरहितेन विष्णोः स्तुतिनमस्कारादि कर्तव्यमिति । 'श्रद्धया देयम् । अश्रद्धयादेयम्' (तै. उ. १. ११. ३); 'श्रद्धयाग्निः समिध्यते' (तै. ब्रा. २. ८. ८) इति श्रुतेः ॥

'अश्रोत्रियं श्राद्धमधीतमव्रत-
मदक्षिणं यज्ञमनृत्विजा हुतम् ।
अश्रद्धया दत्तमसंस्कृतं हवि-
र्भागाः षडेते तव दैत्यसत्तम! ॥

पुण्यं मद्द्वेषिणां यच्च मद्भक्तद्वेषिणां तथा ।
क्रयविक्रयसक्तानां पुण्यं यच्चाग्निहोत्रिणाम् ॥

अश्रद्धया च यद् दानं ददतां यजतां तथा ।
तत् सर्वं तव दैत्येन्द्र! मत्प्रसादाद् भविष्यति ॥'

'विद्याविनयसंपन्ना ब्राह्मणा वेदपारगाः ।
मयि भक्तिं न कुर्वन्ति ये ते चण्डालतां गताः ॥

ब्राह्मणो वैष्णवो ज्ञेयो न ह्यस्मादन्यदेवता ।
मातृवत् परिरक्षन्तं जगत्स्रष्टारमीश्वरम् ।
यो हि नार्चयते मूढस्तमाहुर्ब्रह्मघातकम् ।।
वृथा जप्तं वृथा दत्तं वृथा चेष्टं वृथा हुतम् ।
वृथा तप्यं च तप्तं च यो न भक्तो मयि द्विजः ।।
यत्कृतं च हुतं चापि यदिष्टं दत्तमेव वा ।।
अवैष्णवकृतं सर्वं राक्षसा एव भुञ्जते ।। '

इति महाभारते (१४. App. ४. ३३ ५४. Pr.)

' अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ।। '

(भ. गी. १७. २८)

इत्यादिस्मृतिभ्यश्च श्रद्धयैव[1] स्तुतिनमस्कारादि कर्तव्यम्, नाश्रद्धया ।।

' ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । '

(भ. गी. १७. २३)

इति भगवद्वचनात् स्तुतिनमस्कारादिकं कर्म असात्त्विकं विगुणमपि [2]श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं सात्त्विकं संपादितं भवति । आत्मानं विष्णुं ध्यात्वा स्तुतिनमस्कारदि कर्तव्यम् ।

' नाविष्णुः कीर्तयेद् विष्णुं नाविष्णुर्विष्णुमर्चयेत् ।
नाविष्णुः संस्मरेद् विष्णुं नाविष्णुर्विष्णुमाप्नुयात् ।। '

[1] भक्त्या श्रद्धया च स्तुति. [2] भक्तिश्रद्धा.

इति महाभारते कर्मकाण्डे ।

‘ सर्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ! ।
एवमेतानि नामानि देवदेवस्य कीर्तयेत् ॥
यं यं काममभिध्यायेत् तं तमाप्नोत्यसंशयम् ।
सर्वान् कामानवाप्नोति समाराध्य जगद्गुरुम् ॥
तन्मयत्वेन गोविन्दमित्येतद् दाल्भ्य! नान्यथा ।
तन्मयो वाञ्छितान् कामान् पदमाप्नोति मानवः ॥ ’

इति विष्णुधर्मे । (४१. ४२-४४)

‘ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ ’

इति भगवद्गीतासु । (६. ३१)

‘ अहं हरिः सर्वमिदं जनार्दनो
नान्यत् ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगदा भवन्ति ॥ ’

इति विष्णुपुराणे (१. २२. ८६)

‘ गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ ’

इति मनुवचनम् । (२. २००)

‘ तस्माद् ब्रह्मैवाचार्यरूपेणावतिष्ठते ’ इति व्यासस्मृतेः ।

‘ वरं हुतवहज्वालापुञ्जस्यान्तर्व्यवस्थितिः ।
न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥ ’

इति कात्यायनवचनात्, यत्र देशे वासुदेवनिन्दा तत्र वासो न कर्तव्यः । एतदुक्तं भवति—

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥'

इति श्वेताश्वतरोपनिषन्मन्त्रवर्णात् (६. २३) हरौ गुरौ च परा भक्तिः कार्येति ।

'अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥'

(वि. पु. ६. ८. १९)

'ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् ।
तत् सर्वं विलयं याति तोयस्थं लवणं यथा ॥'

'कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृद् यत्रानुसंस्मृते ॥'

(वि. पु. ६. ८. २१)

'सकृत् स्मृतोऽपि गोविन्दो नृणां जन्मशतैः कृतम् ।
पापराशिं दहत्याशु तूलरशिमिवानलः ॥
(सेयं वदनवल्मीकवासिनी रसनोरगी ।
या न गोविन्द! गोविन्द! गोविन्देति प्रभाषते ॥
पापवल्ली मुखे तस्य जिह्वारूपेण तिष्ठति ।
या न वक्ति दिवा रात्रौ गुणान् गोविन्दसंभवान् ॥)'

'सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥

एकोऽपि कृष्णे सुकृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ।। '

'गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः । ध्यायन् कृते यजन्' इत्यादि । 'नारायणेति शब्दोऽस्ति' इत्यादि ।।

'नरके पच्यमानस्तु यमेन परिभाषितः ।
किं त्वया नार्चितो देवः केशवः शोकनाशनः ।। ' इति ।

'कमलनयन वासुदेव विष्णो' इत्यादि ।।

'गोकोटिदानं ग्रहणे जनस्य
प्रयागगङ्गायुतकल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानं
गोविन्दकीर्त्या न समं शतांशे ।।

हत्यायुतं पानसहस्रमुग्रं
गुर्वङ्गनाकोटिनिषेवणं च ।
स्तेयान्यसंख्यानि हरेः प्रियेण
गोविन्दनाम्ना निहतानि सद्यः ।। '

इत्यादिवचनैः श्रद्धाभक्त्योरभावेऽपि नामसंकीर्तनं समस्तं दुरितं नाशयतीत्युक्तम् । किमुत श्रद्धापूर्वकं सहस्रनामसंकीर्तनं नाशयतीति । 'मनसा वा अग्रे संकल्पयत्यथ वाचा व्यवहरति', 'यद्धि मनसा ध्यायति तद्वाचा वदति' (तै. सं. ६. १. ७) इति श्रुतिभ्यां स्मरणं ध्यानं च नामसंकीर्तनान्तर्भूतम् । अत एव सहस्रनामस्मरणादिना सकलपुरुषर्थसिद्धिर्भवतीति मन्तव्यम् ।।

'यस्मिन् न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशिते च मनसि ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ।।'

इति विष्णुपुराणे (६. ८. ५५) श्रीपराशरेणोपसंहृतम् ।

'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ।।'

इति महाभारते भगवता श्रीवेदव्यासेनोपसंहृतम् ।
(१३. App. १३. २०-१ Pr.)

'हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः' ।
'ओमित्येवं सदा विप्राः पठत ध्यात केशवम्' ।।

इति हरिवंशे (३. ८९. ८-९) कैलासयात्रायां हरिरेको ध्यातव्य इत्युक्तं श्रीमहेश्वरेणापि । एतत्सर्वमभिप्रेत्य 'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः' (श्लो. ८) इत्याधिक्यमुक्तम् ।।

THE THOUSAND NAMES[1]

1. The Universe, *Viśvam.*

Beginning from the stanza, 'From whom all beings, etc.' (verse 11) up to the last verse, Brahman, the cause of origin and preservation of the universe has been spoken of as a single Deity. The twofold

[1] Before repeating the names, Aṅganyāsa, Karanyāsa, and Dhyāna śloka-s should be recited; as they do not belong to the text, I have not translated them into English. They are added in the text as foot-notes.

Brahman [conditioned and unconditioned] is termed in the beginning as the 'Universe' (Viśva). Brahman is spoken of as Viśva being the cause of the entire manifested universe. The word 'universe', being the effect of a cause, is used in the beginning to show that Viṣṇu may be praised by the names of Brahmā, etc. who are also effects.

Or, this universe is in reality not different from the supreme Puruṣa. Hence, Brahman is spoken of as 'Viśva'. The *śruti-s* say: (*MU*, 2. 2. 11, 10) 'This universe is indeed Brahman, this universe is indeed Puruṣa'; 'All this . . .' (*MNU*, 11. 2). There is in reality nothing different from Him.

Or, he who enters (*viś*=to enter) is called Viśva i.e. Brahman. The *śruti* (*TU*, 2. 6) says: 'Having created that, he entered into that.' Moreover, that into which all beings enter (Viśva) during the withdrawal of the world is Brahman. The *śruti* (*TU*, 3. 1) says: 'That into which they enter at their death.' So He permeates all the universe, which is His effect and all the universe enters into Him; hence, either way, Brahman is 'Viśva'.

Or, Viśva means the monosyllable *Om*. The *śruti* (*KU*, 2. 14-16) says: 'That which you see other than *dharma* and *adharma*. . . The Word of which all the Veda-s speak, which all penances proclaim and desiring which, men lead the life of continence (*brahmacarya*), that word, I tell you briefly, is this *Om*. This word is indeed Brahman, this word is indeed the highest; whosoever knows this word obtains

indeed whatever he desires.' *PU*, 5. 2-5 begins by saying: 'This syllable *Om* is verily, O Satyakāma, the higher and lower Brahman. . .' and concludes thus: 'If he meditates on the supreme Puruṣa by means of the same syllable *Om* of three *mātrā-s* (measure, etc.)'. *TU*, 1. 8: '*Om* is Brahman, *Om* is all this;' *CU*, 2. 23: 'As all leaves are attached to a stalk, so is all speech [all words] attached to *Om*. *Om* is all this.' *GK*, 1. 26-29: *Om* is the lower as well as the higher Brahman; it is transcendent, unequalled, having nothing without itself, unrelated to any effect and is changeless. The *Om* is the beginning, middle and end of all; having known it in this manner, one enjoys [the peace of eternal unity]. *Om* is *Īśvara* present in the heart of all; the wise man, knowing *Oṃkāra* to be all-pervading, never finds cause for misery. He who has known the *Oṃkāra* which is the *amātra* [without measure], the *ananta mātra* (endless measure), the substratum in which all illusion dissolves itself, and the all-bliss, is alone the sage and no other.' *TĀ*, 10. 29: '*Om* is that Brahman, *Om* is that Vāyu, *Om* is that Self, *Om* is that Truth.' *BG* (8. 13, 7. 8 and 10. 25) says: '*Om*: the one indestructible Brahman, reciting which and exclusively remembering Me, etc.; I am the sapidity in the waters, O son of Kuntī; I am the radiance in the moon and sun; Praṇava (*Om*) in all the Veda-s; of speech I am the one syllable.' 'That which is first and three-syllabled Brahman and that in which the three Veda-s are established, is the monosyllable (*Om*), the supreme Brahman; and restraint of

breath (*prāṇāyāma*) is the supreme purifier.' (*ĀDS*, 1. 4. 13. 6-7): ' *Om* is the door of heaven; therefore he who is about to study the Veda-s shall begin [his lesson] by pronouncing it. If he has spoken anything else, [than what refers to the lesson], he shall resume his reading by repeating the word *Om*. Thus is the Veda separated from profane speech.' The *smṛti* says: ' The Veda-s begin with Praṇava; they are established in Praṇava; all speech is Praṇava; hence one should repeat Praṇava always.'

From the above, Viśva also means Praṇava or *Om*. As there is not much difference between that which is expressed and the expression itself, Viśva is Praṇava and hence Brahman. The *śruti* (*CU*, 3. 14) says ' All this is Brahman. Let a man meditate on that [visible world] as beginning, ending, and breathing in it [Brahman].' The meaning is: Brahman is that from which all this differentiation proceeds. Brahman is so called because of its *tajjatva*, *tallatva*, and *tadanatva*, (or capacity for production, dissolution and preservation respectively) and when every thing is in One, desires, etc. are not likely to arise; hence it is to be worshipped in peace.

' Listen to the essence of righteousness and having heard it, lay it to your heart—never do anything to others which is injurious to yourself'. *BG*, 6. 32: ' He who through the likeness of the Self, O Arjuna! sees identity, whether in pleasure or pain, is regarded as a perfected Yogin.' 'The unconditioned supreme Self is in this body permeating it; Him who is

to be perceived by knowledge, I neither despise, nor transgress. If I do not perceive Him, the creator of beings, by the [help] of the scriptures, I will leap over this mountain (barrier) and reach Thee, as Hanumān did in the case of the ocean.' (*MB*, III. 147. 8-9): 'If beings be hostile to each other and indulge in hatred, they, as encompassed by profound delusion, are objects of pity to the wise. These are the reasons, O Asura-s. Hear briefly what influences them who have approached the truth. The whole world is but a manifestation of Viṣṇu, who is identical with all things and it is, therefore, to be regarded, by the wise, as not differing from, but as the same as, themselves. Let all of us, therefore, lay aside the angry passions of our race, and so strive that we obtain perfect happiness (*VP*, 1. 17. 82-5).' 'Also become, O Asura-s! equal in regard to all. The worship of Acyuta is equality (ibid., 1. 17. 90).' (ibid., 1. 19. 4-9): 'Whatever power I possess, O father! is neither the result of magic rites, nor is it inborn with me. It is no more than that which is possessed by all in whose hearts Acyuta abides. He who meditates no wrong to others, but considers them as himself, is free from the effects of sin, inasmuch as the cause does not exist. But he who inflicts pain on others in thought, word or deed, sows the seed of future birth; and the fruit that awaits him after birth is great pain. I wish no evil to any, nor will offend any by word or deed; for I behold Keśava in all beings as well as in my own Self. How could pain inflicted by mind, speech or body or that inflicted by elements, or gods,

affect me, who am equal-minded to all? Love for all creatures will then be assiduously cherished by all those who are wise in the knowledge that Hari is all things. . .' 'It is said that conciliation, inducements, punishment and sowing seeds of dissensions are the means of securing friends [or over-coming foes]. But O father! be not angry. I know neither friends nor foes; and where no object is to be accomplished, the means of effecting it are superfluous. It were idle to talk of friend or foe in regard to Govinda, who is the supreme Self, who is the universe itself, as well as its Lord, and who is identical with all beings, . . . (ibid., 1. 19. 35-7). Kingdoms are bestowed by luck upon the stupid, the ignorant, the cowardly, and those to whom the science of government is unknown. Let him, therefore, who aspires for the highest fortune be assiduous in the practice of virtue. Let him who hopes for final liberation learn to look upon all things as equal; and gods, men, animals, birds and reptiles are but forms of the same eternal Viṣṇu, though they appear different. By him who knows this, the whole universe, stationary or moving, is to be regarded as identical with Him, who has assumed this universal form. When this is known, the glorious God of all, who is without beginning or end, is pleased; and, when he is pleased, there is an end to affliction' (ibid., 45-9). *BG*, 7. 19: 'At the end of many births the man full of wisdom comes to Me thinking, "Vāsudeva is all"; he is a Mahātmā very hard to find.' The above quotations show that praises, prostrations, etc. to the Lord should

be accompanied with perfect harmlessness to others; hence the term *Viśva* has been applied to the all-pervading Brahman. *BG*, 11. 55: 'He who does actions for Me, who looks on Me as the supreme Good, who is devoted to Me, who is freed from attachment, who has no hatred towards any beings, he comes unto Me, O Pāṇḍava.' The *VP*, 3. 7. 20: 'You are to consider as the worshipper of Viṣṇu him who never deviates from the duties prescribed for his caste; who looks with equal eye upon friend and foe; who takes nothing [that is not his own], nor injures any being. Know that person of unblemished mind to be a worshipper of Viṣṇu.' 'He who lives pure in thought, free from malice, contented, leading a holy life, feeling friendliness for all creatures, speaking wisely and kindly, humble and sincere, has Vāsudeva ever present in his heart. As the young Sāla tree, by its beauty, declares the excellence of the juice which it has imbibed from the earth, so when the Eternal has taken His abode in the bosom of anyone, that man is noble amidst the beings of this world' (ibid., 24-5). Yama says to his servants: 'Do you move far off from those in whose hearts Viṣṇu is enshrined; and whose steadfast understanding conceives the supreme Person, Vāsudeva, the highest Lord, as one [with his votary] and with all this world. Depart, servants! quickly from those men whose sins have been dispersed by moral and religious merits, whose minds are daily dedicated to the imperceptible Deity and who are free from pride, uncharitableness and malice' (ibid., 32, 26).

From the above quotations and from the fact that the qualifications of a devotee of Viṣṇu are as stated therein, it is further plain that praises, prostrations, etc. to Viṣṇu must be accompanied by perfect harmlessness to others.

The *śruti* (*TU*, 1. 11. 3) says: ' Whatever is given should be given with faith, not without faith'; *TB*, 2. 8. 8: ' By faith the [sacrificial] fire is kindled.' ' O best of Asura-s, you appropriate as your portion the following six: the *śrāddha* rite performed without a follower of *śruti* (*śrotriya*), the study of the Veda-s without vows, sacrifice in which no gift of money is made, oblations given without a priest, charity given without earnestness, and an impure offering. O King of the Asura-s, through my favour you take the merit of those that hate Me, and of those that hate My devotees, the merit of the ritually-minded (Agnihotrin-s) who are engaged in buying and selling (trade), and the merit of those that perform sacrifices or acts of charity without earnestness.' *BG*, 17. 28: ' Whatever oblation, gift, austerity, deed, wrought without faith, is called untrue, O Pārtha; it is naught, here and hereafter.' From the above quotations from *smṛti-s*, we see that prayers, worship, etc. ought to be performed with earnestness and without indifference.

According to the Lord (*BG*, 17. 23), '*Om, Tat, Sat*, has been declared to be the threefold designation of Brahman'. Though the prayer, salutation (*namaskāra*), etc. are not effective and of the highest kind (*sāttvic*), yet, if performed with earnestness, and preceded by the

three names of Brahman, they become effective and *sāttvic*. Imagining himself as Viṣṇu, one should pray and worship. The Karmakāṇḍa portions of the *Mahābhārata* say: 'He who imagines himself as *aviṣṇu* (not Viṣṇu) should not praise Viṣṇu. He who imagines himself as *aviṣṇu* should not worship Him, he who imagines himself as *aviṣṇu* should not meditate on Him and he who imagines himself as *aviṣṇu* will not reach Him.' We read in the *Viṣṇudharma* (41. 42. 4): 'All these are the names of the supreme Brahman; so one should recite the names of the God of gods. Whatever one desires, that one surely obtains. The worship of the Teacher of the universe enables one to realize all one's desires. O Dālbhya, one should imagine oneself as being identical with Govinda and never otherwise; having identified oneself accordingly, one has all one's prayers answered and one reaches the [supreme] abode.' The *BG* (6. 31) says: 'The Yogin who, established in unity, worships Me, abiding in all beings, dwells in Me, whatever may be his mode of existence.' The *VP*, (1. 22. 86), says: 'I am Hari, all this is Janārdana; except Him there is nothing else, be it cause or effect; he who has such a mind suffers not from pains caused by the pairs of opposites, and those produced by transmigratory life.'

MS, 2. 200 says: 'Where there is detraction or even blame of one's spiritual guide (Guru), one must stop both ears, or go from thence elsewhere.' *Vyāsa-smṛti* says: 'Brahman manifests Itself as the teacher.' Kātyāyana says: 'Remain rather in the centre of a

glowing fire than among men who are indifferent to meditation upon Śauri (Viṣṇu).' Hence, one should avoid places where people speak insultingly of Vāsudeva. The *ŚU* (6. 23) says: 'If these truths be told to a highminded man who feels the highest devotion to God, and to his Guru as to God, then they will shine forth.' So the conclusion is that we must cultivate supreme devotion to Hari and to the Guru. *VP*, (6. 8. 19) says: 'By repeating His name even unconsciously, a person is instantly freed from all sins [which run away from him] just as animals do from fear of a lion.' 'Whether knowingly or unknowingly, if the repetition of the names of Vāsudeva is made, it dissolves all sins as water does salt.' 'If He is remembered even once, the terrible sins of Kali that inflict tortures on men in hell vanish then and there' (*VP*, 6. 8. 21). Govinda, once remembered, burns quickly the accumulated sins of men committed during a hundred births, just as fire does, bales of cotton. That tongue which does not utter Govinda! Govinda! Govinda! is a serpent in the cavity of the mouth. The tongue which does not recite day and night the glorious attributes of Govinda is a creeper of sin planted in his mouth in the form of the tongue. He who pronounces the two letters forming the word Hari once has prepared himself to proceed on his march to *mokṣa*. 'One salutation to Kṛṣṇa, well made, is equal to ten horse-sacrifices duly completed; the sacrificer is reborn, while the worshipper of Kṛṣṇa is not' (*MB*, 12. 94. 1). From the above we see that

even in the absence of devotion and earnestness, the recitation of the names [of Viṣṇu] destroys all sin; more so if the recitation is accompanied by devotion and earnestness.

The *śruti* says: 'First one thinks out with the mind and next one speaks with the tongue'; (*TS*, 6. 1. 7): 'Whatever one thinks out with the mind, that one gives out by the tongue.' From the above *śruti-s* we find the recitation of names includes also thought and meditation. In the *Viṣṇupurāṇa* (6. 8. 55), Parāśara concludes thus: 'The man who fixes his mind on Viṣṇu goes not to hell. He who meditates on Him regards even heavenly enjoyments as an impediment; and he whose mind has entered into Him thinks little of the world of Brahmā, even; for, when present in the minds of those whose intellects are pure, He confers upon them eternal freedom. What marvel, therefore, is it that the sins of one, who repeats the name of Acyuta, are wiped out!' The revered Vedavyāsa concludes in the *Mahābhārata* (12. 13. (App.), pr. 20-1) thus: 'After a thorough and exhaustive examination of all *śāstra-s* and after repeated thought on the subject, I have come to the sole conclusion that one should ever meditate upon Nārāyaṇa.' Maheśvara also says in the Kailāsayātrā in the *Harivaṃśa* (3. 89. 8. 9) thus: 'Preserving always your *sattva* aspect, meditate upon Hari alone, O Brāhmaṇa-s; always recite the *Om*, and meditate upon Keśava.' Keeping all this in his mind Vyāsa said (*supra*, verse 8) 'This *dharma* I consider superior to all others.'

Vyākhyā. By sipping the water with which the feet of the pure-minded men have been washed, giving up all actions, convinced 'I am the supreme Brahman,' which is the sole truth, wisdom, and bliss, they cross the great ocean of endless *saṃsāra*; Him, the great preceptor, the Lord of all, I ever worship, in order to obtain immortality.

1. *Viśvam.*

Universe or the cause of the Universe, Brahman, *Oṃkāra*, world, or the creator of it, or indweller or involver of all in him.[1]

'किमेकं दैवतम्' इत्यारभ्य 'किं जपन् मुच्यते जन्तुः' इति षट्प्रश्नेषु 'यतः सर्वाणि' इति प्रश्नोत्तराभ्यां यद्ब्रह्मोक्तं तद् विश्वशब्देनोच्यत इति व्याख्यातं विश्वम्। तत् किमित्याकाङ्क्षायामाह—विष्णुरिति। तथा च ऋग्वेदे—

'आस्य जानन्तो नाम चिद्विवक्तन।
महस्ते विष्णो! सुमतिं भजामहे॥'
(ऋ. सं. १. १५६. ३)

इत्यादिवाक्यैर्विष्णोर्नामसंकीर्तनेन सम्यग्ज्ञानप्राप्तिर्विहिता। वेवेष्टि व्याप्नोतीति विष्णुः। विषेर्व्याप्त्यर्थाभिधायिनो नुक्प्रत्ययान्तस्य रूपम्। देशकालवस्तुपरिच्छेदशून्य इत्यर्थः।

[1] The commentator on the above says that he consulted the *bhāṣya* of Śrī Śaṃkara, four commentaries in verse form, and two small Vyākhyā-s, and made his gloss especially with a view to explaining the etymology of the names, which were not dealt with by his predecessors.

*[आस्य जानन्तो नाम–सुमतिं भजामहे ।

(ऋ. सं १. १५६. ३) 'किमित्ते विष्णो परिचक्ष्यं भूत्' (ऋ. सं. ७. १००. ६), 'इदं विष्णुर्विचक्रमे' (ऋ. सं. १. २२. १७), 'त्रीणि पदा विचक्रमे' (ऋ. सं. १. २२. १८), 'विष्णुर्गोपाः परमम्' (ऋ. सं. ३. ५५. १०), 'विष्णोः कर्माणि पश्यत' (ऋ. सं. १. २२. १९), 'तद्विष्णोः परमं पदम्' (ऋ. सं. १. २२. २०)], 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।' (म. ना. उ. १. १३) इत्यादि श्रुतेः । विशतेर्वा नुक्प्रत्यये रूपं विष्णुरिति ।

'यस्माद्विष्टमिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्माद् विष्णुरिति ख्यातो विशेर्धातोः प्रवेशनात् ॥'
इति विष्णुपुराणे (३. १. ४५)।

'व्याप्ते मे रोदसी पार्थ कान्तिश्चाभ्यधिका स्थिता ।
क्रमणाच्चाप्यहं पार्थ! विष्णुरित्यभिसंज्ञितः ।'
इति महाभारते (शान्तिपर्व अ. ३५०. ४३)

2. *Viṣṇuḥ.* (258 and 657)

The all-pervading.

Six questions beginning with 'Which is the only Deity'? and ending with 'by reciting which is a living being freed'? were asked [in verses 2 and 3 above] and the word Brahman, involved in the answers to those questions as contained in the verses beginning

* [ ] एतच्चिह्नान्तर्गतः पाठोऽधिको दृश्यते ।

with 'that from whom' (verse 11), has been commented upon by us as representing the word *viśva*. Anticipating a question as to what *viśva* is, the word Viṣṇu is introduced. The *Ṛgveda* (1. 156. 3) says: 'Cognizant of his greatness, celebrate his name; may we, O Viṣṇu enjoy your favour': This and many similar passages show that the recitation of the names of Viṣṇu confers right knowledge. The derivative meaning is 'He that pervades', from the root *viṣ* to pervade. Hence it means that He is unlimited by space, time and substance. The *śruti* (*MNU*, 1. 13) says: 'Nārāyaṇa pervades the whole (universe) externally and internally.'

Or, the word Viṣṇu takes its derivation from the root *viś* to enter or permeate. The *VP* (3. 1. 45) says: 'Because this whole world has been pervaded by the energy of the great Self, he is named Viṣṇu, from the root *viś*, to 'enter' or 'pervade'.' 'As I have pervaded the horizons, my glory stands foremost, and as I have measured by steps [the three worlds], O Arjuna, I am named 'Viṣṇu'.' So says the *Mahābhārata* (Śānti Parvan, 328. 37).

Gloss: *Viṣṇu*: his nature is omnipresence, or his rays are spread everywhere, or he stepped over the earth and heaven [in his dwarf incarnation], or he, after creating, entered into them.[1]

[1] Now the reader will clearly understand that this Commentator only gives the meaning which our great Ācārya has set forth. Hence to avoid repetition I shall mention only his additional explanations.

यदुद्देशेनाध्वरे वषट्क्रियते स वषट्कारः । यस्मिन् यज्ञे वा वषट्क्रिया । 'यज्ञो वै विष्णुः' (तै. सं. १. ७. ४) इति श्रुतेः । येन वषट्कारादिमन्त्रात्मना वा देवान् प्रीणयति स वषट्कारः । देवता वा 'प्रजापतिश्च वषट्कारश्च' (ऐ. ब्रा. १. २. १०) इति श्रुतेः ।

'चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥'

इत्यादिस्मृतेश्च । (वि. स्मृ. श्लो. ३५)

3. *Vaṣaṭkāraḥ*.

He is the holy expression Vaṣat.

(A technical word with which oblations are offered in fire to the gods).

He on whose account *Vaṣaṭkāra* is offered; or that sacrifice in which *Vaṣaṭkāra* is offered. The *śruti* (*TS*, 1. 7. 4) says: 'Sacrifice, indeed, is Viṣṇu.'

'Or because He pleases the gods by himself being one with *Vaṣaṭkāra* and other *mantra-s*; or Vaṣaṭkāra is the name of a deity.' The *śruti* says: 'The Lord Prajāpati and Vaṣaṭkāra.' The *smṛti* also (*Viṣṇusmṛti*, verse 35 and *YS*, 1. 5. 10): 'He who is invoked in sacrifices by such *mantra-s* as the four-syllabled *A-śrā-va-ya*, the four syllabled *A- stu- śrau-ṣaṭ*, the two syllabled *Yaha*, the five syllabled *Ye-ya-jā-ma-he*, and the two-syllabled *Vauṣaṭ*—let that Viṣṇu be pleased with me.'

भूतभव्यभवत्प्रभुः । भूतं भव्यं भवच्चेति भूतभव्यभवन्ति, तेषां प्रभुः । कालभेदमनादृत्य सन्मात्रप्रतियोगिकमैश्वर्यं तस्येति प्रभुत्वम् ।

4. *Bhūta-bhavya-bhavat-prabhuḥ.*

The Lord of the past, present and future.

Lord: Because His power consists in His having the absolute existence unassociated with any idea of time.

रजोगुणं समाश्रित्य विरिञ्चिरूपेण भूतानि करोतीति **भूतकृत्** । तमोगुणमास्थाय स रुद्रात्मना भूतानि कृन्तति कृणोति हिनस्तीति वा भूतकृत् ।

5. *Bhūtakṛt.*

The Creator of beings.

He creates all beings, assuming the quality of *rajas* in the form of Viriñci (Brahmā); *bhūtakṛt* also means that he withdraws (*kṛt* to cut) the beings *bhūta-s*) in his *tāmasic* aspect as Rudra.

सत्त्वगुणमधिष्ठाय भूतानि बिभर्ति [1]धारयति पोषयतीति वा **भूतभृत्** ।

6. *Bhūtabhṛt.*

The Sustainer of beings.

He supports (*bhṛt*) or protects all beings in his *sāttvika* aspect.

[1] पालयति.

प्रपञ्चरूपेण भवतीति, केवलं भवतीत्येव वा **भावः**। भवनं भावः सत्तात्मको वा ॥

7. *Bhāvaḥ.*

The absolute Existence.

He expands himself as the universe; or remains as pure existence.

भूतात्मा भूतानामात्मा अन्तर्यामी । 'एष त आत्मा अन्तर्याम्यमृतः' (बृ. उ. ३. ७. ३) इति श्रुतेः ।

8. *Bhūtātmā.*

The Self of beings.

Self: the inner ruler of beings. The *śruti* (*BU*, 3.7.3) says: 'This is thy Self, the inner Ruler, immortal.'

भूतानि भावयति जनयति वर्धयतीति वा भूतभावनः ॥

9. *Bhūtabhāvanaḥ.*

The Generator of beings.

He generates or nourishes beings.

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ १५ ॥

भूतकृदित्यादिभिः गुणतन्त्रत्वं प्राप्तं प्रतिषिध्यते । पूत आत्मा यस्य स **पूतात्मा** । 'केवलो निर्गुणश्च' (श्वे. उ. ६. ११) इति श्रुतेः । गुणोपरागः [1]स्वेच्छया पुरुषस्येति कल्प्यते ॥

[1] स्वेच्छातः.

10. *Pūtātmā.*

Pure Self.

The reader might infer from the names Bhūtakṛt, etc. (nos. 6, 9) that He is attached to *guṇa-s* (*sattva*, etc.). To remove this misconception this name is here introduced.

The *ŚU* (6.11) says: 'He is the Absolute, devoid of qualities.' His attachment to these *guṇa-s* is brought about by His own wish.

परमश्चासौ आत्मा चेति **परमात्मा** । कार्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्तस्वभावः ।

11. *Paramātmā.*

The supreme Self.

Paramātman is he who is beyond cause and effect and is eternal, pure, absolute consciousness, and free.

मुक्तानां परमा, प्रकृष्टा, गतिः गन्तव्या देवता पुनरावृत्त्य-संभवात् तद्गतस्येति **मुक्तानां परमा गतिः** । 'मामुपेत्य तु कौन्तेय! पुनर्जन्म न विद्यते' (भ. गी. ८. १६) इति भगवद्वचनम् ॥

12. *Muktānāṃ paramā gatiḥ.*

The supreme Goal of the emancipated,

because those that attain Him never return [to birth]. The Lord (*BG*, 8. 16) says: 'Having reached Me, O son of Kuntī, verily one knows birth no more.'

नास्य व्ययः विनाशो विकारो विद्यत इति अव्ययः ।
'अजरोऽमरोऽव्ययः' (बृ. उ. ६. ४. १५) इति श्रुतेः ॥

13. *Avyayaḥ.*

The Unchanging.

Avyaya means indestructible. The *BU,* (4. 4. 25) says: 'He is undecaying, immortal and indestructible.'

पुरं शरीरं तस्मिन् शेते इति पुरुषः ।

'नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम् ।
